## संस्कृतबालादर्शे अष्टाविंशः पाठः ॥ २८ ॥

## मेषपालः

**यूथम्** *n* herd, **ऊर्णा** *f* wool, **प्रतिवेशिकः** *m* neighbour, **कितवः** *m* rogue, **मृषा** *in* falsehood, **सम्प्रति** *in* now, **अन्येद्युः** *in* next day, **पूर्वेद्युः** previous day , **न केवलं - किन्तु** *in* not only but also.

**इह पश्य ! मेषाणामजानां** (मेषाणां अजानां of Sheep & goats) **च यूथं** (herd) **गच्छति। यूथस्य पृष्ठतो गच्छन् पुरुषो** (पुरुषः) **मेषपालः** (shepherd) **। स मेषान् अजांश्च प्रचाराय** (for grazing in the meadows) **वनं नयति। ते तत्र स्वेच्छया** (स्व इच्छया with own desire) **चरन्तः उदरं पूरयन्ति** (grazing fill their stomach) **। न केवलं तृणान्येव** (तृणानि एव only grass) **किन्तु** (but) **पर्णान्यपि** (पर्णानि अपि also leaves) **ते भक्षयन्ति** (they eat) **।**

**अयं मेषपालोऽजानां** (मषपालः अजानां) **क्षीरेण मेषाणामूर्णया च** (मेषाणाम् ऊर्णया with milk and wool) **स्वकुटुम्बं भरति** (supports his family) **। अजानां क्षीरं महदौषधम्** (महत् औषधम् great medicine) **। मेषाणामूर्णाभिः** (मेषाणाम् ऊर्णाभिः with wool) **शैत्यरक्षणाय** (शैत्य रक्षणाय for protection from cold) **कम्बलाः** (blankets) **सम्मा-नार्हाणि (सम्मानार्हाणि** honorable, fashionable) **रम्याणि** (beautiful) **वस्त्राणि च क्रियन्ते** (are made) **। अतोऽजाः मेषाश्चात्यन्तमुपयुक्ताः प्राणिनः** (अतः अजाः, मेषाः च अति अन्तम् उपयुक्ताः प्राणिनः therefore goats and sheep are very useful living beings) **।**

मेषपालोऽयं (मेषपालः अयं this shepherd) स्वस्य पुत्रं मेषैः सह वनं प्रेषयन्नासीत् (प्रेषयन् न आसीत् sending, his son, he was not there) । वनं गतः स चपलो (चपलः fickle) बालक एकस्मिन् दिने विनोदार्थम् (for fun) ‘ व्याघ्रो व्याघ्रः ’ इत्युच्चैराक्रोशत् (इति उच्चैः अक्रोशत् thus shouted loudly) । तदा प्रातिवेशिका (neighbors) जनाः शस्त्राण्यादाय (शस्त्राणि आदाय having brought the weapons) तस्य समीपमधावन् (समीपम् अधावन् were running near him) । तत्र व्याघ्रो नासीत् । तान् समागतान् वीक्ष्य (looked at) । स बालोऽहसत् (बालः अहसत् the boy laughed) । ‘कितवोऽयं (this is a rogue) असत्यवादी बालकः (the boy is a liar) ’ इति वदन्तस्ते (वदन्तः ते saying they) रोषेण (with anger) प्रत्यगच्छन् (प्रति अगच्छन् they *pl*, went back) ॥

अथान्येद्युः (अथः अन्येद्युः then, next day) सत्यमेव (सत्यम् एव truly) व्याघ्रः समायातः । तं दृष्ट्वा भीतो बालकः " व्याघ्रो-व्याघ्रः" इत्याक्रोषत् (इति आक्रोषत् thus cried) । अयं पूर्वेद्युरिव (पूर्वेद्युः इव like the previous day) मृषाऽऽक्रोशतीति (मृषा आक्रोशत् ईति false distress cry, false alarm) मत्वा (having thought) न कश्चित् तत्र गतः । व्याघ्रो बालकस्य कर्णौ नासिकां च अभक्षयत् (ate) । तया वेदनाय पीड्यमानः (suffering) स कः एवास्ते (एव आस्ते stays only) । तस्मादयं मेषपालः (तसमात् अयम् मेषपालः therefore this shepherd) स्वयमेव सम्प्रति तान् वनं नयति (now, this boy does take them, sheep & goats by himself) ।

अनृतवादिनः (अनृत वादिनः speaker of a lie) सत्यमपि वचनं जना

असत्यं मन्यन्ते (they, think believe) । तस्मात् विनोदार्थमपि (विनोदार्थं अपि even for fun) असत्यं न वक्तव्यम् (should not be spoken) । किन्तु सर्वदा सत्यमेव वक्तव्यम् (Truth only should be spoken) । तथा च उक्तम् - - - घ सत्यं वद । धर्मं चर इति ॥

क) प्रश्नाः - -

१. इह केषां यूथं गच्छति ?

इह मेषाणामजानां च यूथं गच्छति ।

२. कः मेषपालः ?

मेषपालः इह मेषाणामजानां च यूथस्य पृष्ठतो गच्छन् पुरुषः ।

३. स किं करोति ?

स मेषानामजानां यूथं प्रचाराय वनं नयति ।

४. ते तत्र किंकुर्वन्ति?

ते तत्र स्व इच्छया चरन्तः उदरं पूरयन्ति ।

५. किं ते भक्षयन्ति ?

ते वने तृणानि च पर्णान्यपि भक्षयन्ति ।

६. मेषपालः स्वकुटुम्बं कथं भरति ? मेषपालः अजानां क्षीरेण मेषाणामूर्णया स्वकुटुम्बं भरति ?

७. कस्मात् कारणात् अजाः मेषाश्च अत्यन्तम् उपयुक्ताः प्राणिनः ?

अजानां क्षीरं महदौषधम्। मेषाणामूर्णाभिः शैत्य रक्षणाय कम्बलाः सममान-अर्हाणि रम्याणि वस्त्राणि च क्रियन्ते।

८. मेषपालोऽयं कं कै सह कुत्र प्रेषयन् आसीत् ?

अयं मेषपालः स्वस्य पुत्रं मेषैः सह ववनं प्रेषयन् आसीत्।

९. वनं गतः स चपलः बालः किमकरोत् ?

वनं गतः एकस्मिन् दिने विनोदार्थं " व्याघ्रो-व्याघ्रः " इति उच्चै आक्रोशत्।

१०. कदा के किमादाय तस्य समीपमधावन् ?

प्रातिवेशिका जनाः शस्त्राणि आदाय तस्य समीपम्-अधावन्।

११. तत्र समागतान् वीक्ष्य स बालः किमकरोत् ?

तत्र व्याघ्र नासीत् समागतान् जनान् वीक्ष्य स बालः अहसत्।

१२. किं वदन्तस्ते रोषेण प्रत्यगच्छन् ?

" कितवोऽयं असत्यवादी बालकः " इति वदन्तस्तो रोषेण प्रत्यगच्छन्।

१३. अन्येद्युः किं समभवत्?

अथानेद्युः सत्यमेव व्याघ्रः समायातः।

१४. तदा बालकः किमकरोत् ?

तदा स बालकः तं व्याघ्रं दृष्ट्वा भीतो " व्याघ्रो-व्याघ्रः " इति आक्रोशत्।

१५. कुतः स गृह एवास्ते ?

व्याघ्रः बालकस्य कर्णौ नासिकां च अभक्षयत्। तया वेदनया पीडयमानः स गृह एवस्ते (एव अस्ते)।

१६. कुतः (why) असत्यं कदाऽपि न वक्तव्यम् ?

अनृतवादिनः सत्यमपि जनान असत्यं मन्यते।

१७. अस्मिन् पाठे उपदेशाः के ?

विनोदार्थमपि असत्यं न वक्तव्यम्। किन्तु सर्वदा सत्यमेव वक्तव्यम् - - " सत्यं वद। धर्मं चर "

ख) मृषा , मिथ्या , नक्तं , दिवा - - एतान्युपयुज्य (एतानि उपयुज्य) वाक्यानि रचयत ।

१. जानः तस्मिन् पुरुषे विश्वासं न स्थापयन्ति यः सदा मृषा वदति।

२. मरौ जनाः तटाकस्यजलं इव स्थानं पश्यन्ति, एतत् केवलं 'मिथ्या'।

३. जनाः दिवा स्वकर्मसु निमग्नाः सन्ति।

४. यदा आकाशे मेघैः न आवृते नक्तं नक्षत्राणि दृश्यन्ते। *(are seen)*

**ग)** संख्येयशब्दाः (ordinals)

| **पुंसि** (*masc.*) | **स्त्रियाम्** (*fem.*) | **क्लीबे** (*neu.*) |
|---|---|---|
| प्रथमः | प्रथमा | प्रथमम् |
| द्वितीयः | द्वितीया | द्वितीयम् |
| तृतीयः | तृतीया | तृतीयम् |
| चतुर्थः | चतुर्थी | चतुर्थम् |
| पञ्चमः | पञ्चमी | पञ्चमम् |
| षष्ठः | षष्ठी | षष्ठमम् |
| सप्तमः | सप्तमी | सप्तमम् |
| अष्टमः | अष्टमी | अष्टमम् |
| नवमः | नवमी | नवमम् |
| दशमः | दशमी | दशमम् |
| विंशत्त्मः | विंशत्तमी | विंशत्तमम् |
| त्रिंशत्तमः | त्रिंशत्तमी | त्रिंशत्तमम |
| चत्वरिंशत्त्मः | चत्वारिंशत्तमी | चत्वारिंशत्तमम् |
| पञ्चाशत्तमः | पञ्चाशत्तमी | पञ्चाशत्तमम् |
| षष्ठितमः | षष्ठितमी | षष्ठितमम् |
| सप्ततितमः | सप्ततितमी | सप्ततितमम् |
| अशीतितमः | अशीतितमी | अशीतितमम् |
| नवतितमः | नवतितमी | नवतित्मम् |
| शततमः | शततमी | शततमम् |

# <u>शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary</u>

मेषपालः ***m*** shepherd

ऊर्णा ***f*** wool

यूथम् ***a*** herd

प्रातिवेशिकः *n* neighbour

कितवः ***m*** rogue

संप्रति ***in*** now

अन्येद्युः *in* next day

पूर्वेद्युः ***in*** previous day

मृषा ***in*** falsehood

मेषः ***m*** sheep

पृष्ठतः ***in*** behind

प्रचारः ***m*** pasturing

स्वेच्छा ***f*** self-will

चपलः *a.m.* fickle

आक्रोशत् ***P.*** cried out

अधावत् ***P.*** ran up

अहसत् *P.* laughed

वेदना *f* pain

आस्ते ***A.*** stays

न केवलं किन्तु ***in*** not only but also